
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

प्र. दे. आपुरो साधु स. ७

॥श्रीगुरुभ्योनमः॥

॥अथश्रीमच्छंकराचार्यकृतप्रबोधसुधाकर

॥प्रारंभः॥

॥श्रीगुरुगणपतिराधामुकुंदराजायनमः॥ नित्यानंदैकरसं
सच्चिन्मात्रं परंज्योतिः॥ पुरुषोत्तममजमीशं वंदे श्रीयादवा
धीशं॥१॥ यं वर्णयितुं साक्षात् श्रुतिरपि मूकेव मौनमा
वहति॥ सोस्माकं मनुजानां किं वाचां गोचरो भवति॥
॥२॥ यद्यप्येवं विदितं तथापि परिभाषिणो भवंत्येव
आध्यात्मशास्त्रसारं हरिकीर्तनकी चिंतनकीर्तनाभ्या
सः॥३॥ कृतैर्बहुभिरूपायैरभ्यासज्ञानभक्त्याद्यैः॥

॥१॥

पुंसां विनाविरागं मुक्तेरधिकारिता न स्यात् ॥४॥ वै
राग्यमात्म[illegible]बोधो भक्तिश्चेति त्रयं गदितं ॥ मुक्तेः
साधनमादौ तत्र विरागो वितृष्णता प्रोक्ता ॥५॥ साचाहंम च्छा
मताभ्यां प्रच्छन्ना सर्वदेहेषु ॥ तत्राहंता देहे ममताभा
र्यादि विषयेषु ॥६॥ देहः किमात्मकोयं कः संबंधोथ
वा विषयैः ॥ एवं विचार्यमाणे हंता ममता निवर्तेत ॥
॥७॥ स्त्रीपुंसोः संयोगात्संपातः शुक्रशोणितयोः ॥

प्रविशन्जीवः शनकैः स्वकर्मणा गर्भमारभते ॥८॥ मातृगुरू

दरदर्यां कफमूत्रपुरीषपुर्यां र्गो ॥ जठराग्निज्वालाभिर्न

वमासं पच्यते जंतुः ॥९॥ दैवात्प्रसूतिसमये शिशुस्ति

रश्चीनतां यदा याति ॥ शास्त्रैर्विखंड्य सततदा बहिरिह निष्का

छिद्यद्यदा तु निःसार्य

स्यते तिबलात् ॥१०॥

वियोगाद्रयविपत्कलह दारिद्र्यैः

ते प्रबलैः ॥११॥

॥ जन्मांतरमपि भूयः क्लेशः किं शक्यते वक्तुं ॥१२॥

× २ प्रसवसमीरैश्च तदायः क्लेशः सोप्यनिर्वाच्यः ॥ × ॥२॥

नरपशुविहंगतिर्यग्योनि चतुरशीतिलक्षाण[illegible]णि॥कर्म
निबद्धोजीवः परिभ्रमन्यातनां भुंक्ते॥१३॥चरमस्तत्र नृ
देहस्तथाग्रजन्मान्वयोत्पत्तिः॥स्वकुलाचारविचारः
श्रुतिप्रचारश्च तत्रापि॥१४॥आत्मानात्मविवेको देहस्य
विनाशिनाज्ञानं एवं सति स्वमायुः प्राज्ञैरपिनीयतेमि
थ्या॥१५॥आयुःक्षणलवमात्रं नलभ्यते हेमकोटिभिः
क्वापि॥ तच्चेद्गच्छति सर्वं मृषा ततः काधिका हानिः॥१६॥
नरदेहातिक्रमणात्प्राप्तौ पश्वादिदेहयोनीनां॥ स्वतंत्रो

रप्यशानं परमार्थस्यात्रकावार्ता॥१७॥ सततं प्रवाह्यमा
णे वृषभै रश्वैर्गजैर्महिषैः॥ हा कष्टं श्मश्रुक्षामैः श्रान्तैर्नोश
क्यते वक्तुं॥१८॥ रुधिरांत्रधातुमज्जामेदो मांसास्थि
संहतिर्देहः॥ सर्वहि त्वचापिनद्धस्तस्मान्नो भक्ष्यते का
कैः॥१९॥ नासास्यवदनाद्वा कफं मलं प्रायुतोऽविसृजन्
॥ स्वयमेवैति जुगुप्सां मंतः प्रसृतं च नो वेत्ति॥२०॥ प थिप
तितमस्थि दृष्ट्वा स्पर्शभयादन्यमार्गतो याति॥ नोप
श्यति निजदेहमस्थिसहस्राद्वृतं परितः॥२१॥ केशावधि

॥३

नखराग्रादिरमंतः पूतिगंधेन॥ संपूर्णबहिरपि [illegible]चंद
नकर्पूराद्यैर्विलेपयति॥२२॥ यत्नादस्यपि धत्ते स्वाभावि
कदोषसंघातं॥ औपाधिकगुणनिवहं प्रकाशयन्श्लाघ्य
ते मूढः॥ क्षतमुत्पन्नं देहे यदि न प्रक्षाल्यते त्रिदिनं॥ त
त्रोत्पतंति बहवः क्रिमयो दुर्गंधिसंकीर्णे॥२४॥ यो दे
हः स्रक्तोभूत्स्रक्पुष्पशय्योपशोभितेतल्पे॥ संप्रतिस
रज्जुकाष्ठेनियंत्रितः क्षिप्यते वन्हौ॥२५॥ सिंहासनो

पवित्रं यं दृष्ट्वा मुदमवाप लोको यं ॥ तं कालगरूषतनुं विलोक्य
नेत्रे निमीलयति ॥२६॥ एवंविधमतिमलिनं देहं यत्सन्न
याचलति ॥ तं विस्मृत्य परेशं वहत्यहंतामनित्येऽस्मिन्
॥२७॥ आत्मा सच्चिद्रूपः मांसरुधिरास्थिनिर्मि
तो देहः ॥ इति लज्जितः सुधीमानितर शरीरं सद्धिं मनु
ते ॥२८॥ इति श्रीमच्छंकराचार्यविरचिते प्रबोधसुधा
करे देहनिंदा प्रथमप्रकरणं ॥१॥ श्री॥ ॥श्री॥ ॥श्री॥
नाम
॥४॥

॥श्रीगुरुराघवेन्द्रकुंरराजायनमः॥ मूढः कुरुते विषयजकर्दम
संमर्दमर्दनं मिथ्या॥ दुरदृष्टवशादिरिदं देहं गेहं पतत्येव वि
॥१॥ भार्या रूपविहीना मानसखेदाय जायते पुंसां॥ अत्यंत
रूपवती सा परपुरुषैर्वशीक्रियते॥२॥ यः कश्चित्परपुरु
षो मित्रं भृत्यो यथाभिक्षुः॥ पश्यति हि साभिलाषं विवक्षि
तोदाररूपवतीं॥३॥ यं कंचित्पुरुषवरं स्वगतु रति संदृष्टं
दृष्ट्वा॥ नमृगयति किं मृगाक्षी मनसेव परस्त्रियं पुरुषः
॥४॥ रूपविहीना भार्या भर्तृकोपात्प्रतिक्षणं क्षीणः॥

७

नोलभते सुखलेशं बलिमिव बलिभुग्बहुच्छेकः ॥५॥ व
निता नितांतमज्ञा स्वाज्ञामुल्लंघ्य वर्तते यदि सा ॥ शत्रोरप्य
धिकतरापराजिता विष्य सौकि मुत ॥६॥ नानाशरीरकष्टै
र्धनव्ययैः साध्यते पुत्रः ॥ उत्पन्नमात्रपुत्रे जीवितुं चिंतागरी
यसी भवति ॥७॥ जीवन्नपि किं मूर्खः प्राज्ञः किं शीलभा
ग्भवति ॥ जारश्चोरः पिशुनः पतितो द्यूतप्रियः क्रूरः ॥८॥
पितृमातृबंधुघाती मनसः खेदाय जायते पुत्रः ॥ चिंतयति
तातनिधनं पुत्रोद्व्याद्यधीशतां हे तो ॥९॥ सर्वगुणै रूप

५

10

न्नः पुत्रः कस्यापि कुत्रचित्भवति ॥ सोप्यायूरुग्णो वा ह्य
नपत्यो वा तथापि खेदाय ॥७॥ इति श्रीमच्छंकराचार्यविर
चिते प्रबोधसुधाकरे स्त्रीपुत्रदुःखवर्णनं नाम द्वितीयप्रक
रणं ॥२॥ ॥ ॥ श्रीमुकुंदगुरुभ्यो नमः ॥
पुत्रात्सुखमिति रिक्तिचेत्तदपि वचोस्ति धुरस्य सहं ॥ नापुत्रस्येत्यनया
लोको लोकोति श्रुत्या को वा प्रभाष्यते लोकः ॥७॥ मुक्तिः संस
रणं वा तदन्यलोकोथवा नाद्यः ॥ सर्वेपि पुत्रभाजस्तन्मुक्तौ न
संसृतिर्भवति ॥१२॥ द्वितीयपक्षे ह्यपुत्रस्य श्रवणादुपायो

मृषा भवेदेव ॥ यस्तृतीयो पि पुत्रेष्वादिक प्रदत्तौ वेदवादोयं
॥१३॥ इत्थं शरीरकष्टैर्दुखं संप्राप्यते मूढैः ॥ तस्माद्दुः
खं ज्ञेयं संसारे भृशं पतितानां ॥१४॥ पितृमातृबंधुभगिनी
पितृव्यजामातृमुख्यमित्राणां ॥ मार्गस्थानामिव युतिरने
कयोनिभ्रमात् क्षणिका ॥१५॥ द्रव्यं यावद्विपुलं यावत्प्रचुरः
परोपकारश्च ॥ तावत्सर्वे सुखदा व्यत्ययतः शत्रवः सर्वे ॥१६॥
अश्नंति चेदनुदिनं बंदिन इव वर्णयंति संतुष्टाः ॥ तच्चेन्न
द्वित्रिदिनांतस्तेपि निंदं कुर्वंति ॥१७॥ दुर्भरजठरनि

ति

मितं समुपार्जयितुं प्रवर्तते चित्तं ॥ लक्षावधि वर्द्धितं तथा
प्यलभ्यं कपर्दिका भिन्नं ॥१८॥ लब्धश्चेद्दायिकोर्थः ऽन्यादीनां प
भवेत्स्वार्थः ॥ नृपचोरतोप्यनर्थस्तस्माद्व्यो घमो व्यर्थः ॥१९॥
अन्यायमर्थभाजां पश्यति भूपो खगामिनां चोरः ॥ पिशुनोव्य
सनं प्राप्य दायादानां गणैः कलहं ॥२०॥ पातकभरैरनेकैरर्थं
समुपार्जयंति राजानः ॥ अश्वमतंगजहेतोः प्रतिक्षणं नश्यते
सोर्थः ॥२१॥ राज्यांतर मभिमना द्दृणभंगा नूमंत्रिभि
प्ररोचा द्धा ॥ विषशस्त्र गुप्तघातान्मग्नाश्चिंतार्णवे भूपाः ॥
॥२२॥ इति श्री प्रबोध॰ विषयनिंदानाम द्वितीयप्रकरणं ॥

3

॥ हसति कदाचिद्रोदिति भ्रांतः संहृष्टा दिशः परिभ्रमति ॥ हृष्टं क
दापि रुष्टं शिष्टं दुष्टं च निंदति स्तौति ॥ १ ॥ कमपि द्वेष्टि सरोषं
ध्यात्मानं श्लाघते कदाचिदपि ॥ चित्तं पिशाचममभवद्राक्षस्या
तृष्णया व्याप्तं ॥ २ ॥ दंभाभिमानलोभक्रोधमोहमत्सरैश्चेतः ॥
आक्रम्यते सम   भितः श्वभिरिव पतितानु मार्गे ॥ ३ ॥
त तस्मात्सुखविरागो मनो निश्चितं त्यजेद्दर्पं ॥ तदनभिलषितं
कुर्यान्निर्व्यापारं ततो भवति ॥ ४ ॥ इति श्री० मनोनिंदाप्रकरणं०
॥ ३ ॥ ~ ~ ~   ॥ श्रीमुकुंदगुरुभ्यो नमः ॥ संसृतिपा
रावारे ह्यगाधविषयोदके न संपूर्णे ॥ नृशरीरमंबु शरणं कर्म

म

समीरैरित स्तत नश्चलति ॥१॥ च्छिद्रैर्नैवभिरूपेतं जीवो नौका
पतिर्महानलसः ॥ च्छिद्राणामनिरोधाज्जलपरिपूर्णं प तत्प
थः सततं ॥२॥ च्छिद्राणां तु निरोधात्सुखेन पारं परं याति ॥ त
स्मादिंद्रियनिग्रह यतेन कश्चिन्नरः त्यन्ततं ॥३॥ पश्यति हि परां
युवतीं सकामं पितन्मनोरथं कुरुते ॥ ज्ञात्वैव नरः प्राप्तिं व्यर्थं म
नुजो हि पापभाग्भवति ॥४॥ पिशुनैः प्रकाममुदितां परस्य नि
न्दां शृणोति कर्णाभ्यां ॥ तेन परः किंचि यते व्यर्थं मनुजो हि० ॥५॥
परापवादानृतं रसनावदति प्रतिक्षणं तेन ॥ परहानिर्लब्धिः
का व्यर्थं मनुजो हि० ॥६॥ विषयेंद्रिययोर्योगानिमेषसमयेन

यत्सुखं भवति ॥ विषये नष्टे दुःखं यावज्जीवं पतयोर्मध्ये ॥ ७ ॥
हेयमुपादेयं वा प्रविचार्य सुनिश्चितं तस्मात् ॥ अल्पसुखस्य
त्यागादनल्पदुःखं जहाति सुधीः ॥ ८ ॥ धीवरदत्तमिहामिषमभ्य
न्यैसारिणो म्रियते ॥ तद्वद्विषयान्भुंजन्कालग्रस्तो नरः पत
ति ॥ ९ ॥ उरगग्रस्तार्धतनुर्भेको भातीह मक्षिकाशतशः ॥
एवं गतायुरनिशं विषयान्समुपार्जयत्यंधः ॥ १० ॥ इति श्रीशंकरा॰
इंद्रियनिग्रहो नाम प्रकरणं ॥ १ ॥
श्रीगुरुमुकुंदाय नमः ॥ स्रीयो द्रमतोयवहा सागरमुपयातिनी
चमार्गेण ॥

८

साचेदुरमएव स्थितासा।तौ किं नयाति बाधितत्वं ॥१॥ एवं मनः
स्वहेतुं विचारयतस्तु स्थिरं भवेदंतः ॥ नवहि श्वेदेति तदा किं
नामत्वं स्वयं याति ॥२॥ वर्णा स्तंभः प्रचयात्तु पेगुरूनिर्सरैः
क्षारं ॥ ग्रीष्मेणेव सुष्के शनकै राविर्भवेरत्सत्वं ॥३॥ तद्द्वि
षयो द्विरंद नमः प्रथानं मनः कलुषं ॥ तस्मिन्विरागशुष्केश
नकैरा० ॥४॥ यं विषयमभिलषित्वा धावति बाह्येंद्रियद्वारा ॥ त
स्या प्राप्तौ स्खलति तथा यथा स्वगतं किंचित् ॥५॥ नगनगरदुर्ग
दुर्गमसरितः परितः परिभ्रमश्चेतः ॥ यदि नोलभते विषयं
विषया चितमेव खिन्नमायाति ॥६॥

५

चेतः परशुमशुभपथप्रधावमानं निराकर्तुं ॥ वैराग्यमेव मुचि
तं गलकाष्ठं विनिर्मितं धात्रा ॥ ७ ॥ गुप्तेयुवत्यवयवे तु यथा
दिदृक्षा स्त्रैणात्मनां न हि तथा प्रकटे किलास्ते ॥ संदृष्ट एव
सहजो मनसः स्वभावस्तन्नाशये न हि विराग मृते स्त्फ
पायः ॥ ८ ॥ तुंबीफलं जलनिलवल्याद्धि क्षिप्तमप्यूर्ध्वं ॥ तद्वन्म
नः स्वरूपे निहितं यत्नाद्विहि यातिनि ॥ ९ ॥ इह वा पूर्वभवे वा स्व
कर्मणैवार्जितं फलं यद्यत् ॥ शुभमशुभं वा तत्तद्भोगोप्यधा
स्थितो भवति ॥ १० ॥ माद्देयं माहेयं मित्रममित्रं प्रषाम तुले ॥ शुभ

मधुभं बासत्यः सरसत्कर्मजितोभोगः ॥११॥ भानुं बाहि
मध्यानुं ग्रसति स्वर्भानुरास्करः स्कचिरं ॥ तमत्पीजाहेतु
सचरांतरकल्गनकिं स्यात् ॥१२॥ पनिद्रावसरे यत्स्कख
मेतत्किं विषयजं यस्मात् ॥ निरिंद्रियप्रदेशाव
स्थानं चेतसो निद्रा ॥१३॥ चेतःश्वंचलया धृत्या
चिंतानिचयपंजरे ॥ धृतिं बध्नाति नैकत्र
पंजरे केसरी यथा ॥१४॥ अहारितुंग

कुड्ये गृहे वरुद्धो यथा व्याघ्रः ॥ बहुनिर्गमप्रय
त्नैः श्रांतास्ति ष्ठत्य यत्नः सन् ॥ १५ ॥ सर्वेंद्रिया
र्न वरोधाद्दुर्योगशतैर्निर्गमं वीक्ष्य ॥ श्रांतं तिष्ठ
ति चेतो निरुध्यमत्वं तद्दायाति ॥ १६ ॥ प्राणस्पंद
निरोधात्संसंगाद्वासनात्यागात् ॥ हरिचरणभक्ति
योगान्मनः स्ववेगं जहाति शनैः ॥ १७ ॥ इति श्रीमत्
शंकराचार्यविरचिते प्रबोधसुधाकरे मनोनिग्रहो नाम पंच
मप्रकरणं ॥ ५ ॥ ॥ ॥ ॥

॥श्रीगुरुभ्यो नमः॥ परगृहगृहिणीपुत्रदविणा नामागमे विना
शवाः॥ आतिथेर्हर्षविषादौ किं वास्यातां क्षणं स्थातुं ॥१॥ दैवानु
स्थितं गतं वापि किंचिद्विषयमाढ्यमल्पं वा॥ नो हृष्यन्नो सीद
न्वीक्ष्य गृहेष्वतिथिवन्निवसेत्॥२॥ विषयाणां वैराग्याद्घ स्त्या
गो वांतिवत्सवरः॥ उपदेशः॥ सच मध्यमरमशान वैराग्यतो हीनः॥
॥३॥ ममताभिमानशून्यो विषयेषु पराङ्मुखः पुरुषः॥ तिष्ठन्न

निज

पि सदने न बाध्यते कर्मभिः क्वापि॥४॥ रे जीव जागृहि गृही तर
हासि नूनं कालेन तो शिशुकिशोरदशा कसति॥ श्वः किं करिष्यसि
मरिष्यसि चेदकस्मा क्षीणे शरीर मरिभिः परिभूयमानं तत्॥५॥
दृष्ट्वागतं कालगृहीत मुच्चैः हसैः शरीरं तुमतो यियासुः॥ वृक्षांतरं

दृष्टमिवेन्द्रियाणि पूर्वं वयांसीव वयांसि चेयुः ॥६॥ कुत्राप्यरण्य
देशे सुनीलतृणवालुकोपचिते ॥ शीतलतरुतलभूमौ सुखं शया
मानस्य पुराणस्य ॥७॥ तरवः पुष्पफलाढ्याः सुगन्धशीतानिलाः
परितः ॥ कलकूजितवरविहगाः सरितो मित्राणि किं न स्युः ॥८॥
वैराग्यभाग्यभाजः प्रसन्नमनसो निराशस्य ॥ अप्रार्थितफल
भोक्तुः पुंसो जननी कृतार्था स्यात् ॥९॥ इत्थं पद्यं वत च्युतं
पादमवेक्ष्यापि प्रमादात् तदा शोकापायनदर्पितं ~~[illegible]~~ श्रुत
वते तोषाय च श्रेयसे ॥ स्वातन्त्र्याद्विषयाः प्रयान्ति दमी सो.
धापतेस्सु श्रियं संपन्नाः स्वयमेव च क्षमस्तु खं निःश्रेयसं
नन्यते ॥१०॥

११

पिस्मत्पा मेनिवासमुत्कूरभवाटव्यां चिरं पर्यटन् संता
पत्रय दीर्घ दाव दहन ज्वालावली व्याकुलः॥ यत्मान् फल्गु
सुखे गृहीत नयनश्चेतः कुरंगो बला दाशापाश वशाद तो
पि विषपथ्याधे र्मैषा हन्यते॥१॥१॥ स्विपोगो वियोगो यथा
पि विषयप्याधै मैषा हन्यते
इस्यते वै तथा चं चलाक्षि प्रचारोपचारः॥ इदं दृश्यजातं
समस्तं समस्तं विजानीहि चित्ते विजानीहि भेदः॥१२॥
॥ इति वैराग्य॥६॥ छ छ छ
॥ श्रीगुरु गणेश राधामुकुंदराआयनमः॥ यद्यपि अलध्येरुदकं
लथापि थालस्य हापको मेघः॥ नाभ्या भूमे रूपे लंलर्द्ध अथा

प्रतीतं भवति ॥१॥ उत्पन्नेऽपि विना प्रबोधं सुखं न स्यात् ॥
सम्भवेद्गुरूपदेशात्तस्माद्गुरुमाश्रयेत्प्रथमं ॥२॥ त्रेधा प्रतीति
शास्त्रा रूढा गुरुतस्तथात्मनस्तत्र ॥ शास्त्रात्प्रतीतिस्तद्वन्मधु
रो गुडोऽस्तीति ॥३॥ अग्रे गुडप्रतीतिर्दूरात् गुडदर्शनं यद्वत् ॥
आत्मप्रतीतिरस्मात् गुडभक्षणजं सुखं यत्स्यात् ॥४॥
रसगंधरूपशब्दस्पर्शान्यांश्च विषयांश्च ॥ कस्माद्दत्तु मूर्ये
ले नो देहान्नेंद्रियग्रामात् ॥५॥ मूलदेहेंद्रियवर्गीयतो न
जानाति दाहजं दुःखं ॥ प्राणश्चेन्निद्रायां तस्कर बाधा सकिं
वेत्ति ॥६॥ गाढ ध्वांत गृहांतर क्षितितल [illegible] ते दीपं निधायो

ज्वलं पंचच्छिद्रमधोमुखं हि कलशं तस्योपरि स्थापयेत् ॥
तद्बाह्ये परितश्च नीरविमलं वीणांच कस्तूरिकां सद्रत्नं
व्यजनं न्यसेच्च कलशच्छिद्राद्यर्थं निर्गतं ॥७॥ तेनांशेन
पृथक् पदार्थनिरवहज्ञानंच यज्जायते तत् गंधः
कलशेन वा किमु पदार्थो भांडेन तैलेन वा ॥ किं सूत्रे
णचवैतदस्ति स्फुटं प्रत्यक्षबोधादतो दीपज्योति
रिहैकमस्ति शरणं देहे तथात्मास्थितः ॥८॥ इति
श्री आत्मसिद्धिप्रकरणं ॥७॥ ५ ५ ५

ना

२५

॥श्रीगणेशाय नमः॥ चिन्मात्रः परमात्मा ह्यपदात्मा न मात्मतया

दा अभवत्सोऽहं नामातस्मासीत्तदभिमुखं ॥१॥ द्वेधेव भाति तस्मात् दो

पतिश्च पत्नी तदा भवतः॥ तस्मादयमाकाश स्त्रियेव परिपू

र्यते सततं ॥२॥ सेयमपेक्षांचक्रे ततो मनुष्या अजायंत ॥

पि इत्युपनिषदः प्राहुर्वाजसनेयिवाजसनेयोक्तिः॥३॥ चिरमा

भवा नंदानुत्सुषुप्सिरेवकाप्यवस्थाभूत् ॥ परमात्मनस्तु तस्यां

स्वमपदे वोपस्थिता माया ॥४॥ सदसद्विलक्षणा सोऽपर

मात्मसत्ताश्रयानादिः॥ श्रीशांभवी सा च गुणत्रयरूपा सू

ते सचराचरं विश्वं ॥५॥ इत्थं मुकुंदराजो मायारूपं नि

१३

रूपयां यके निजरूपविस्मृतिरित्थं प्रथयां चकुस्तथान्येपि ॥ ६ ॥
मायातावददृश्या दृश्यं कार्यं कथं जनयेत् ॥ नंनुभिरदृश्यं कथं
भवति ॥ ७ ॥ स्वप्नेसुरतानुभवाच्छुक्रद्रावो यथा स्थितोवसने ॥
अनृतनरप्रबोधेवसनोपहतिर्भवेत्सत्या ॥ ८ ॥ स्वप्ने पुरुषः सयो
योषिदसत्या तयोर्युतिश्चमृषा ॥ शुक्रद्रावः सत्यस्तद्वत्प्रकृते
पि संभवति ॥ (९) रज्जनीयतातिदुरंता नलक्ष्यते तु स्वभावो स्याः ॥
एवमदृश्या माया तत्कार्यं जगदिदं दृश्यं ॥ माया तावदियं स्या
द्यावत्स्वभावो न हर्षदो भवति ॥ १० ॥ सौदामिनी वैरयति न
मुनिभिः संप्रेक्ष्यमाणेव ॥ ११ ॥ मायाब्रह्मोपगतावित्याजीवाः
शिताप्रोक्ता ॥ चिदचिद्ग्रंथिश्चाहं नदृश्यं ज्ञेयमामोक्षात् ॥ १२ ॥

अवै: पत्र [illegible]

घटमठकुड्यैरावृत आकाशस्तदाकृयो भवति ।। तद्वदावि
द्यावृतमिह चैतन्यं जीव इत्युक्तं ।।१३।। ननु कथमावरणं स्या
दज्ञानं ब्रह्मणो विशुद्धस्य ।। सूर्यस्य किं न भिस्तं रात्रिभवं स्व
प्रकाशस्य ।।१४।। दिनकरकिरणा सन्ते मेघैराछाद्यते सूर्यः ।।
न खलु दिनस्य दिनत्वं रविकूलघनसांद्रसंघातैः ।।१५।। अज्ञा
नेन तथात्मा शुद्धोप्याछाद्यते सुचिरं ।। न परं तु लोकसि
द्धौ प्राणिषु तच्चैतन्यनाशनि: ।।१६।। इति श्री ग्रंथसुधाकरे बो
मायासिद्धिनामाष्टमप्रकर्णं ।। ५ ५ ५ ५ ५

॥श्री राधामुकुंद गुरुभ्योनमः॥ स्थूलशरीरस्योत्तलिंगशरी
रंचतस्योत्तः॥ कारणमस्योत्पन्नं तस्यतोमहाकारणंतुरियं॥१॥
स्थूलं निरूपितंप्रागधुनासूक्ष्माद्याह्रितं क्रमः॥ अंगुष्ठ मू
मात्रःपुरुषः प्रकृतिरितियत्प्राहेतत्सूक्ष्मं॥२॥सूक्ष्माणिपंच
भूतान्यसवः पंचेंद्रियाणि पंचैव॥ षोडशायंतःकरणंतत्सं
घातोहिसूक्ष्मतनुः॥३॥ तत्कारणंस्मृतंयत्तस्योत्तवासना
ज्ञातं॥ तस्यप्रवृत्तिहेतुबुध्या अयपत्रतुरीयंस्यात्॥४॥
तत्सारभूतब्रह्मौतत्प्रतिफलितंतुतत्रचैतन्यं॥ जीवः

सउक्त आद्यैर्यो हि पितिस्फूर्तिरूढपुषि ॥७॥ चरतरतरंग
सांगा प्रति भास्करं चंचलत्वं स्यात् ॥ अप्स्कु तथा चंचलता
चैतन्ये चितप्रचांचल्यात् ॥ नन्वर्कप्रतिबिंबः सलिलादिषु यो
वभासयति ॥ किमितरपदार्थनिवहं प्रतिबिंबोप्याभ
नस्तद्वत् ॥८॥ प्रतिफलितं यत्तेजः सवितुः कांस्यादिपा
त्रेषु ॥ तदनु प्रविष्टं तं गृहमन्यार्थान् प्रकाशयति ॥ टी॰
चित्प्रतिबिंबस्तद्वद्बुद्धिषु यो जीवतां प्राप्तः ॥ नेत्रादीन्द्रिय
मार्गैर्बहिरर्थान् सोवभासयति ॥९॥ इति श्री प्रबोध॰ लिंगदेह
॥ सिद्धि नाम नवमप्रकरणं ॥९॥

॥श्री राधाप्रभुकुं दगुरुभ्यो नमः॥ तदिदं य एव मायो वेद ब्रह्माहमस्मी
ति॥ स इत्थं सर्वं स्यान्नस्य हि देवा श्च [illegible] नेशते हसै॥१॥ तेषां
स भवत्यात्मा यो न्यामथ देवतामुपास्ते सः॥ श्री [illegible] अहमन्यो
सावन्यः श्चेत्थं यो वेत्ति पशुवत्सः॥२॥ इत्युपनिषदामुक्ति
स्तथा स्मृता भगवदुक्तिश्च॥ ज्ञानी त्वात्मैव मे मतं पतिर्मद्ये त्यत्र
युक्तिरपि॥३॥ ऋजुवक्रं वा काष्ठं हुताशदग्धं समग्नितां या
ति॥ तत्किं हस्तग्राह्यं ऋजुवक्राकारसत्त्वेपि॥४॥ एवं च आ
त्मनिष्ठो ग्राह्याकारश्च जायते पुरुषः॥ देहीव दृश्यते सोऽपरं
त्वयं केवलो ह्यात्मा॥५॥ प्रतिफलितिभानुरेको नैकशरावोद

केषु यथा॥ तद्वदसौ परमात्मा ह्येको नैकेषु देहेषु॥ ६॥ देवा देहशरावे भग्ने किं वा विलीयते सूर्यः॥ प्रतिबिंबचंचलत्वाद्दर्कः किं चंचलो भवति॥ ७॥ सव्यापारं कुरुते यथैकसवितुः प्रकाशेन॥ तद्वच्चराचरमिदं ह्येकात्म समयाचलति॥ चीयेनोदकेन कदली पंकजजात्याद्यः प्रवर्धंते॥ मूलकपलांडुलशुनाद्ये नैव ते भिन्नरसगंधाः॥ ९॥ एको हि सूत्रधारः काष्ठप्रतिकृतिरनेकशो युगपत्॥ स्तंभाग्रपट्टिकायां नर्तयती हपगूढ यथा॥ १०॥ गुडखंडशर्कराद्या भिन्ना [illegible] स्य किं हृतयोर्यथै[illegible] वेक्षोः॥ केयूरकंकणाद्या यथैव भेदा हि हे

१८

न्नस्य ॥११॥ एवं पृथक्कृत्वभावं पृथगाकारं पृथक् प्रकृति
स्थ ॥ जगद्भावचयमुच्चैरेकेनैवात्मना चलति ॥१२॥ स्कंधघृत
सिद्धमन्नं यावन्ना भाति मार्गगिरत्तावत् ॥१२॥ स्पर्शश्च भारः
क्षतपीडा न स्मिन् स्कंधे नत्ताभवति ॥१३॥ मानुषमतं आहि ग
घभूधरादिष्व नु स्थूलं ॥ यः पश्यति जगदीशं स्कंधे सावद्ध
धानंदं ॥१४॥ इति॰ प्र॰ अद्वैतसिद्धिनामिदं॰ ॥१॥
श्रीगुरुमुकुंदायनमः ॥ यद्वत्सूर्येऽभ्युदिते सव्यापारं जनः कुरु
ते ॥ तन्न करोति विवस्वान्न कारयति तद्वदात्मापि ॥१॥ लो
हे हुतभुग्व्याप्ते लोहांतर प्रताड्यमानेपि ॥ तस्यांतर्गतव

न्हेः किं स्यान्निर्घातजं दुःखं ॥२॥ निष्ठुरकुठारघातैः काष्ठे सं
छेद्यमानेपि॥ तस्याभ्यंतरवर्ती वह्निः किं छिद्यते न हुता॥
॥३॥ तनुसंबंधाज्जातैः स्फुरखदुःखै [illegible] र्लिप्यते नात्मा॥ भू
ते कृतिरपि भूयो नाश्नन्त्यो भिचाक शीत्यादि॥४॥ निशि
वेश्मनि प्रदीपे दीप्यति चोरस्तु वित्तमपहरति॥ ईरयति वा
रयति वा किं [illegible] तं दीपं तथात्मापि॥५॥ मोहांतर्दैर्वधवशा
त्कस्मिंश्चित्समुदिते विपन्नेपि॥ दीपस्तु व्यस्तपवा रवि घ
तिकिं न दृष्टात्मापि॥६॥ इति॰ प्रबोध॰ कर्त्त्याभि॰ एकादश॰
॥ ~ ~ ~ ॥११॥ ~ ~ ~

श्री गुरुराधाकुं[illegible] राजायनमः॥ रविचंद्रदीपवन्हि प्रमुखाः स्वप्र
काशास्य॥ यद्यपि तथाप्यमीभिः प्रकाश्यते क्वापि नैवात्मा
॥१॥ चक्षुर्द्वारे वस्यात्परमात्मनो भानमेतेषां॥ यद्यन्येपि
पदार्था न ज्ञायंते केवलात्लोकात्॥२॥ तत्राप्यक्षिद्वारा सहा[illegible]
भूलो भवेदात्मा॥ नो चेत्सत्यालोके पश्यत्येषः कथं नाधीन्
॥३॥ सत्यात्मन्यपि किं न्वो भानं तच्चेंद्रियांतरेण स्यात्॥ अंधे
त द्रूप्रतिबंधे करसंबंधे पदार्थभानं हि॥ [illegible]॥ आनाति येन स
वेकेन च तं नाविजानीयात्॥ इद्रूपनिषदा मुक्तिर्बुध्यते आ
त्मा स नातस्मात्॥ इति॰ प्र॰ स्वप्रकाशसिद्धिनाम द्वादश॥ ५५५
॥१२॥

॥श्रीमुकुंदगुरुभ्योनमः॥ यावत्क्षणंक्षणार्धं स्वरूपहरिचिंतनं
~~[illegible]~~॥ क्रियते॥ तावद्दक्षिणकर्णे त्वनाहतः श्रूयतेशब्दः
॥१॥ चित्तविक्षेपो परमाद्यथायथा याति नैश्चल्यं॥ वेणोरिव
दीर्घतरस्तथातथा श्रूयतेनादः॥२॥ सिध्यारंभस्थिरताभि
श्राम आदबुद्धीनां॥ उपलक्षणं हि मनसः परमानंदानुसं
धानं॥३॥ भेरीमृदंगशंखाद्याहतनादेक्षणं मनोरमते॥ किंपुनरना
हतेस्मिन्नमधुरानूमधुरे ह्यखंडिते स्वच्छे॥४॥ नादाभ्यंतर्वर्तिज्यो
तिर्यद्दृश्यते स्फुरितं॥ तत्रमनोलीनंचेन्नपुनः संसारबंधाय॥५॥ परमा
नंदानुभवात्स्फुरितं नादानुसंधानात्॥ श्रेष्ठचित्तलयः स्यात्सच्चिन्म
लये बनेकेषु॥६॥ इति श्रीप्रबोधनादसिद्धिनाम०॥१३॥

१८

२

श्रीगुरुभ्यो नमः ॥ संसारतापतप्तानां यो निभ्रमात्पर्भ्रांतं
॥ लब्ध्वा परमानंदं न चलति चेतः कदा क्वापि ॥ १ ॥ अद्वैता
नंदभरात्किमिदं कोऽहं न कस्याहं ॥ इति मंथरतां यातं य
दा तदा मूर्छितं चेतः ॥ २ ॥ चिरमात्मानुभवादात्माकारं प्र
जायते चेतः ॥ सरिदिव सागरयाता समुद्रभावं प्रयात्युच्चैः
॥ ३ ॥ दृष्टौ द्रष्टरि दृश्ये यदनुस्यूतं हि भानमात्रं स्यात् ॥ त
त्रोपक्षीणं चेतश्चैतन्ये मूर्छितं भवति ॥ ४ ॥ आत्मन्यनु
प्रविष्टं चित्तं नापेक्षते पुनर्विषयान् ॥ क्षीरादुद्धृतमाज्यं य
था पुनः क्षीरतां न याति ॥ ५ ॥ याति स्वसंमुखत्वे दृश्यान्ते वा यदा

तदा भवति ॥ द्रष्टृदृश्यविभेदो ह्यसंमुखो न तद्भवति ॥ ६ ॥ एकं दृश्यमात्रेण त्रेधा द्रष्ट्रादिकं हि समुदेति ॥ त्रिविधे तस्मिन् लीने दृङ्मात्रमवशिष्यते पश्चात् ॥ ७ ॥ दर्पणतः प्राक् पश्चात् अस्ति मुखं प्रति मुखे तदाभासे ॥ आदर्शेऽपि च नष्टे मुखमस्ति मुखे तथैवात्र ॥ ८ ॥ इति श्रीप्रबोध० मनोलयसिद्धिर्नाम चतुर्दश० ॥ १४ ॥ ५५५

॥ श्रीगुरुमुकुंदराजाय नमः ॥ माधुर्यं गुडपिंडे यत् तत्स्यां शक्ते तु मात्रेऽपि ॥ एवं न पृथक् भावो गुडतन्माधुर्ययोरस्ति ॥ ॥ १ ॥ अथवा न भिन्नभावः स्यान्निद्रादौ जागरस्यान्ते ॥ अंतः स्वचेतस्थिरस्या तदाश्रित्ये ह्यद्वयानंदं ॥ २ ॥ अस्ति

गंभीरे पारे ज्ञानसदानंदसागरे स्फारे ॥ कर्मसमीरणचपला
जीवतरंगावलिः स्फुरति ॥ ३ ॥ खरतरकरैः प्रदीप्ते स्फुर्दि
ते चैतन्यतिग्मांशौ ॥ स्फुरति मृषैव समंतादनेकविध
जीवमृगतृष्णा ॥ ४ ॥ अंतरदृष्टे यस्मिन्नजगदिदमाशान्
परिस्फुरति ॥ दृष्टे यस्मिन्सकृदपि विलीयते कास्य स
रूपं ॥ ५ ॥ बाह्याभ्यंतरपूर्णे परमानंदार्णवे निमग्नो यः
चिरमाप्लुतैव कलशो महाह्रदे ज्ञानुतनया या ॥ ६ ॥ संपूर्णी
वरणांबुलैन विनिहतेन ब्रह्मांडोदरे सूत्रे सत्त्रिगुणात्मके

समुदिते शश्वत्परं ज्योतिषि ॥ अज्ञानां यतमिस्रवारणपटौ
बोधप्रदीपोदये शुद्धज्ञानबलां पतंत्यनुदिनं चेत: पतंगादि
व ॥७॥ पूर्णापूर्णतरे परात्परतरे प्यज्ञानपारे हरौ संवीत्स्फा
रस्फुधार्णवे विरहिते वीचीतरंगादिभि: ॥ भास्वत्कोटि
विकाससं ज्वलदिगाकाशावकाशेतरा मानंदैक
रसे निमग्नमनसो नत्वं न चाहं जगत् ॥८॥ इति श्री प्रबोध०
प्रबोधाख्यं पंचदश० ॥१५॥ ‰ ‰ ‰

.२:

॥ श्रीगुरुराधामुकुंदराजायनमः ॥ चित्ते सत्वोत्पत्तौ तद्वि
द्विवोधोदयो भवति ॥ तद्धैवस्य स्थिरस्याद्यदि चित्तं शुद्धि
मुपयाति ॥१॥ शुध्यति हि नांतरात्मा कृष्णपदांभोजभक्तिमृते ॥
वसनमिव क्षाराद्यै भक्त्या प्रक्षाल्यते चेतः ॥२॥ यद्वत्समलादर्शो स्वच्छ
र्ं भस्मादिना शुद्धे ॥ जलि फलति वक्त मुच्चैः शुद्धे चित्ते तथाज्ञा
नं ॥३॥ ज्ञानं तुलतबीजं हरिभक्त्या ज्ञानिनोऽपि येस्युः ॥ मूलं चैवा दूर्तं
हे नाव श्रलणा रूपे ॥४॥ इत्युपनिषत्तयोर्वा द्वौ भक्तौ भगवदुप
दिष्टौ ॥ क्लेशाद क्लेशाद्वा मुक्तिः स्यादेतयो मध्ये ॥५॥ स्थूलासूक्ष्मा
चेति द्वेधा हरिभक्तिरुद्दिष्टा ॥ प्रारंभे स्थूला स्यात्सूक्ष्मा स्यात्सदा

॥६॥

शाठ्यं॥ स्वाश्रमधर्माचरणं कृष्णप्रतिमा त्सवो नित्यं॥ विविधोप॰
चारकरणै हरिदासैः संगमः शाश्वत्॥ ७॥ कृष्णकथा संश्रवणे महो
त्सवः सत्यवादश्च॥ परयुवतौ द्रविणे वा परापवादे पराङ्मुखता॥ ८॥
ग्राम्यकथा सूद्वेगः सत्तीर्थे गमनतात्पर्यं॥ यदुपति कथावियोगे
व्यर्थं गतमायुरिति चिंता॥ ९॥ एवं कुर्वति भक्तिं कृष्णकथा
नुग्रहोत्पन्ना॥ समुदेति सूक्ष्म भक्तिर्यस्यां हरिरंतराविशति॥
॥१०॥ स्मृतिसत्पुराण वाक्यै यथाश्रुतायां हरे मूर्तौ॥ मानसपूजा
भ्यासो विजननिवासे पितात्पर्यं॥ ११॥ सत्यं समस्तजंतुषु कृष्ण
स्यावस्थितेर्ज्ञानं॥ अद्रोहो भूतगणेष्वतस्तु भूतानुकंपा स्यात्॥

१२

प्रार्जितयदृच्छालाभे संतुष्टिर्दारपुत्रादौ ॥ ममताऽभ्यन्तमतो
निरहंकारतमक्रोधः ॥ १३ ॥ मृदुभाषिताप्रसादो निजनिंदा
यां स्तुतौ समता ॥ सुखदुःख शीतोष्ण द्वंद्व समत्वमापदो नैभयं
॥ १४ ॥ निद्राहारविहारेष्वनादरः संगराहित्यं ॥ वचनेष्वनवकाशो
न्हरिस्मरणे न शाश्वती शांतिः ॥ १५ ॥ केनापि गीयमाने हरि
गीते वेणुनादे वा ॥ आनंदाविर्भावो युगपदष्ट सात्विकोद्रेकः
॥ १६ ॥ तस्मिन्ननुभवति मनः प्रगृह्यमाणं परमात्मस्फुरणे ॥ स्थिर
तां याते तस्मिन्याति मदोन्मत्तदंतिदशां ॥ १७ ॥ यद्धेतुं स
मुपागतो ऽस्त्यथ पुनः संवर्धितो येन वा नानोपायशतैरलयो

४३

रपहरत्यार्तिं तरुच्छायया॥ पुष्पैर्नवपल्लवैः फलभरैर्यद्वत्तथा
ज्ञानवान् शांतो भूतसुहृत्तमः सममतिर्मित्रेष्वमित्रेष्वपि॥१८॥
जंतुष्वभगवद्भावं भगवति भूतानि पश्यति क्रमशः॥ एतादृशी
दयाचेत् तर्हैव हरिदासवर्यः स्यात्॥१९॥ इति॰ प॰ स्फ भक्तिम
हिमाव॰ षोडशप्र॰॥१६॥ ॥ ॥
श्रीराधामुकुंद गुरुभ्यो नमः॥ यमुनातटनिकटनिकटस्थितवृं
दावनकानने रम्ये॥ कल्पद्रुमतलभूमौ चरणं चरणोपरि स्थाप्य
॥१॥ तिष्ठंतं घननीलं स्वतेजसाभासयंतमिह विश्वं॥ पीतांबर

परिधानं चंदनकर्पूरलिप्तसर्वांगं ॥२॥ आकर्णपूर्णनेत्रं कुं
डलयुगमंडितश्रवणं ॥ मंदस्मितमुखकमलं सकौस्तुभोदा
रमणिहारं ॥३॥ वलयांगुलीयकाद्यानुज्वलयंतं स्वलंकारान् ॥
गलविलुलितवनमालं स्वतोउरन्यस्तकलिकालं ॥४॥ गुंजार
वालिकलितां खुं गुंजापुंजान्विते शिरसि ॥ भुंजानं सहगोपैः
कुंजांतवर्तिनं हरिं स्मरत ॥५॥ मंदारपुष्पवासेमंदानिलसे
वितं परानंदं ॥ मंदाकिनीधृतपदं मंदानंदप्रदं महापुरुषं ॥६॥
सुरभीकृतदिग्वलयं सुरभीशौरावृतं परितः ॥ सुरभीलिक्ष
णमिहासुरभीमं यादवं नमत ॥७॥ कंदर्पकोटिसुभगं वांछित

फलदं दयार्णवं कृष्णं ॥ त्यक्त्वा कमन्यविषयं नेत्रयुगं द्रष्टुमुत्स
हते ॥ ८ ॥ पुण्यतमामतिस्फुरसां मनोभिरामां हरेः कथां सक्त्वा ॥
श्रोतुश्रवणद्वंद्वं ग्राम्यकथामादरं वहति ॥ ९ ॥ दौभाग्यमिंद्रिया
णां कृष्णे विषयेषु सत्सु सर्वेषु ॥ क्षणिकेषु पापकरणेष्वपि स
ज्जंतेन्यविषयेषु ॥ १० ॥ इति॰ प्रबोध॰ ध्यानाख्यं॰ ॥ १८ ॥ छ छ छ

श्रीराधामुकुंदराजायनमः ॥ श्रुतिभिर्महापुराणैः सगुणगुणा
तीतयोरैक्यं ॥ यत्प्रोक्तं गूढतया तदहं वक्ष्येति विशदार्थं ॥ १ ॥
मूलेष्वंतर्यामी ज्ञानमयः सच्चिदानंदः ॥ प्रकृतेः परः परात्मा

२३

यदुकुलतिलकः स एवायं ॥२॥ ननु स गुणो दृश्यतनुस्तथैकदे
शाधिवासश्च ॥ स कथं भवेत्परात्मा प्राकृतवद्रागरोषयुतः
॥३॥ इतरैर्दृश्यपदार्था दृश्यंते नेन चक्षुषा सर्वे भगवाननन
याद्दृष्ट्या न लभ्यते ज्ञानदृग्गम्यः ॥४॥ यद्दिव्यस्वरूपदर्शनस
मये पार्थाय दत्तवान् भगवान् ॥ दिव्यं चक्षुस्तस्मान्न दृश्य
ता युज्यते न हरौ ॥५॥ साक्षाद्यथैकदेशे वर्तुलमिव दृश्यते
रवेर्बिंबं ॥ विश्वं प्रकाशयति न तु सर्वैः सर्वत्र दृश्यते युगपत्
॥६॥ यद्यपि साकारोयं तथैकदेशीव भाति यदुनाथः ॥ सर्व
गतः सर्वात्मा तथापि सोयं सच्चिदानंदः ॥७॥ एको भगवान्नेत्रे

युगपद्योपी ष्वनेकास्फ॥ अथवा जगाम गेहं जनक श्रुतदेवयो

र्युगपत्॥ ८॥ अथवा कृष्णाकारास्वचदूं दुर्योधनं पश्यत्॥

तस्मा व्यापक आत्मा हरिरीश्वर श्रीकृष्णः॥ ९॥ अथवक्ष

सि पद्मा जस्थ यान श्रीवत्सः श्रीपतेः किं द्वेष्यः॥ भक्तानां मस्करा

णामन्येषां श्राफलं सदृशं॥ १०॥ तस्मान्न कोपि शत्रुर्नो मित्रं

नाप्युदासीनः॥ नृहरेः सन्मार्थः सफलः शाखीव यदुनाथः

॥ ११॥ लोह शलाकानिवहैः स्पर्शाश्मनि। अभिद्यमानेपि॥ स्व

र्णत्वमेति लोहं द्वेष्या इपि विद्विषां तथा प्राप्तिः॥ १२॥ नन्वात्मनः

सकाशादुत्पन्ना जीवसंततिश्चेयं॥ जातः प्रियतम आत्मा

तत्र कृतेपि किं न संभवति ॥१३॥ वत्साहरणावसरे पृथ
ग्वयोरूपवासनावेषात् ॥ हरिरजमोहं कर्तुं गोवत्सान्निर्ममे
स्वस्मात् ॥१४॥ अग्नेर्यथा स्फुलिंगाः क्षुद्रास्तद्व्युच्चरंतीति
॥ श्रुत्यर्थं दर्शयितुं नानाव्यतनोत्स्वकं देहं ॥१५॥ यमुनातीर
निकुंजे कदाचिदपि वत्सकानि चारयति ॥ कृष्णे तथायि गोपे
ष्वद्रेगाश्चारयत्स्वारात् ॥१६॥ वत्सान्निरीक्ष्य दूरान्द्रा
वः स्नेहेन संभ्रांताः ॥ तदभिमुखं धावंत्यस्तूर्णं कव
त्योप्यपाययन्प्रमुदा ॥१७॥ गोपा अपि निजबालानुज
गृहुर्मूर्धानमाघ्राय ॥ इत्थमलौकिकलोभस्तेषां तत्क्षणं

वबृधे ॥१८॥ गोपावत्सान्यथवा पूर्णकृष्णात्मकान्यभ
वन् ॥ तेनात्मनः प्रियत्वं दर्शितमेतेषु कृष्णेन ॥१९॥
प्रेयः पुत्राद्वित्तात् प्रेयोन्यस्माच्च सर्वस्मात् ॥ अंतरतरोय
मात्मेत्युपनिषदः सर्वसत्यतामिहिता ॥२०॥ ननु उच्या
वचभूपते त्वात्मा समएव वर्ततेथ हरिः ॥ दुर्योधनेर्जुने
वा तरतमभावं कथं गतवान् ॥२१॥ बधिरांधपंगुमूक
दीर्घाःखर्वाः स्वरूपाश्च ॥ सर्वे विधिना दृष्टाः सगोपवत्सा।
श्चतुर्भुजा स्तेन ॥२२॥ भूतसमत्वं समो हि मशकेन नागेन ॥
लोकेस्त्रिभिरेतेर्वेत्युपनिषदा भाषितं साक्षात् ॥२३॥

आत्मा तावद्देहमोत्क्रान्तपैव ननु वासुदेवश्चोरन् ॥ नानाकैतवय
त्नैः परयुवतीभिः कथं रेमे ॥ २४ ॥ सुंदरमभिनवरूपं कृष्णं
दृष्ट्वा विमोहिता गोप्यः ॥ तमभिलषंत्यो मनसा कामाद्विरह
व्यथां प्रापुः ॥ २५ ॥ गछंत्यस्तिष्ठंत्यो गृहकृत्यपराश्चयं जानाः
कृष्णं विनान्यविषयं समक्षमपि जानुनाविंदन् ॥ २६ ॥ दुःसह
विरहभ्रांतास्वांता दृषद्रत्नरूनरवगांश्चपश्यन् ॥ हरिरयमिति
स्फ्रीता सरभसमालिंगयांचक्रुः ॥ २७ ॥ कापिच कृष्णायंती
कस्याश्चित्पुतनायंत्याः ॥ अपिबत् स्तनमिति साक्षात् व्यासो

नारायणः प्राह ॥२८॥ तस्मान्निजनिजद्वैतान् कृष्णाकारान्
व्रजस्त्रियः प्रेक्ष्य ॥ अस्मत्पतिः पत्नीनामंतर्यामी हरिः साक्षात्
॥२९॥ परमार्थतो विचारे गुडवन्मधुरत्वदृष्टांतात् ॥ नश्वर
मपि नरदेहं परमात्माकारतां याति ॥३०॥ किंपुनरनेनशक्ते
लीलावपुरीश्वरस्येह ॥ कर्माण्यलौकिकानि स्वमायया विदध
तोन्हरेः ॥३१॥ मृद्भक्षणेन कुपितां विकसितवदनस्य
मातरं वक्त्रे ॥ विश्वमदर्शयि दृखिलं किंपुनरथ विश्वरूपो
सौ ॥३२॥ इति श्रीमच्छंकराचार्यविरचिते प्रबोधसुधाकरे

नारायणः प्राह ॥२८॥ तस्मान्निजजनिजद्वैतान् कृष्णाकारान्
व्रजस्त्रियः प्रेक्ष्य ॥ अस्मत्पति पत्नीनामंतर्यामी हरिः साक्षात्
॥२९॥ परमार्थतो विचारे गुडवन्मधुरत्वदृष्टांतात् ॥ नश्वर
मपि नरदेहं परमात्माकारतां याति ॥३०॥ किंपुनरनेनशक्ते
लीलावपुरीश्वरस्येह ॥ कर्माण्यलौकिकानि स्वमायया विदध
तोऽन्तर्हरेः ॥३१॥ मृद्भक्षणेन कुपितां विकसितवदनस्स्व
मातरं वक्रे ॥ विश्वमदर्शयदखिलं किंपुनरथ विश्वरूपो
सौ ॥३२॥ इति श्रीमच्छंकराचार्यविरचिते प्रबोधसुधाकरे

२८

52

सगुणनिर्गुणयोरैक्यं नाम अष्टादशप्रकरणं सपूर्णमस्तु ॥ १८

॥ श्रीराधामुकुंदराजार्पणमस्तु ॥ ५ ५ ५ ५ ५ ॥

ग्रंथसंख्या २३५

॥ इति श्रीमच्छंकराचार्यकृत प्रबोधसुधा
॥ कर: सामाप्त: ॥

[OrderDescription]
,CREATED=02.07.20 11:45
,TRANSFERRED=2020/07/02 at 11:55:10
,PAGES=55
,TYPE=STD
,NAME=S0003254
,Book Name=M-1776-PRABODH SUDHAKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,